**C7100VS**

## संस्कृतम् सम्प्रेषणात्मकम्

## कक्षा - दशमी

## सङ्कलनात्मकं मूल्याङ्कनम् ( प्रथम्सत्रम् )-2013

**निर्धारित समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्तिः

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | - | **10 अङ्काः** |
| खण्डः (ख) रचनात्मक-कार्यम् | - | **15 अङ्काः** |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | - | **30 अङ्काः** |
| खण्डः (घ) पठित-अवबोधनम् | - | **35 अङ्काः** |

(ii) सर्वेप्रश्नाः**अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंख्या अवश्यं लेखनीया।

(v) उत्तराणिसंस्कृतेन एव लेखनीयानि।

### खण्ड : 'क'

### अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 10

रामः श्यामश्च द्वौ धनिकौ आस्ताम्। रामस्य विशालं भवनम् आसीत्। तस्य अनेके उद्योगाः चलन्ति स्म। अतएव सः सर्वदा प्रसन्नचित्तः ईश्वरं स्मरन् आनन्दे निमग्नः भवति स्म। श्यामः लोभी आसीत्। सः अधिकाधिकं धनसङ्ग्रहं कर्तुम् इच्छति स्म। सर्वदा असन्तुष्टः दुःखी च भवति स्म। एकदा श्यामः कार्यवशात् रामस्य गृहम् अगच्छत्। आनन्दमग्नं तं दृष्ट्वा अपृच्छत्-'भवतः आनन्दस्य शान्तेश्च किं रहस्यम्'? रामः उवाच-'मित्र! मम चत्वारः अङ्गरक्षकाः सन्ति,प्रथमः तु सत्यं यत् माम् अपराधात् सर्वदा रक्षति। द्वितीयःस्नेहः, तृतीयः न्यायः, चतुर्थः च त्यागः अस्ति।

**प्रश्ना:**(2 + 2 + 4 + 2 =10)

**(I) एकपदेन उत्तरत।**

(i) रामस्य कति अङ्गरक्षका: आसन्?

(ii) राम: कस्मिन् निमग्न: भवति?

**(II) पूर्णवाक्येन उत्तरत।**

(i) श्याम: लोभवशात् किम् इच्छति स्म?

(ii) श्याम: रामं आनन्दमग्नं दृष्ट्वा किम् अपृच्छत्?

**(III) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं निर्देशानुसारं चित्वा लिखत -**

(i) 'रहस्यम्' इति पदस्य विशेषणपदं गद्यांशे किम् प्रयुक्तम्?

(अ) भवत: (ब) आनन्दस्य (स) शान्ते: (द) किम्

(ii) 'अन्याय:' इति पदस्य विलोम पदं गद्यांशे किं प्रयुक्तम्?

(अ) त्याग: (ब) अपराध: (स) न्याय: (द) आनन्द:

(iii) 'आनन्दमग्नं तं दृष्ट्वा अपृच्छत्' अत्र तं सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) श्यामाय (ब) रामाय (स) उद्योगाय (द) अंगरक्षकाय

(iv) 'सुखस्य' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?

(अ) दु:खस्य (ब) लोभी (स) आनन्दस्य (द) स्नेह:

**(IV) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत।**

## खण्ड: 'ख'

## रचनात्मकं-कार्यम् - ( 15 अङ्का: )

2 **भवत्या: सख्या: लताया: विद्यालये पर्यावरणविषये एका संगोष्ठी जाता। गोष्ठीं वर्णयन्ती लता सुरेखायै पत्रम् एकं लिखति। मञ्जूषात: समुचितपदानि चित्वा पत्रं पूरयत।**

वसन्तविहार:,

नवदिल्लीत:

__(i)_ सुरेखे!

नमस्ते,

ह्य: अस्माकम् विद्यालये__(ii)_एका महत्त्वपूर्णा गोष्ठी अभवत्। तत्र महानगरेषु वर्धमानं प्रदूषणं दृष्ट्वा पर्यावरणस्य (iii)__उपायानां विषये चर्चा अभवत्। गोष्ठ्यां वक्तॄणां विचारसार: आसीत् यत्_(iv)__बहि:, नदीजलेषु, मार्गेषु च अवकर: न क्षेपणीय:। (v)___समये-समये जलशुद्धि: करणीया:। मार्गेषु, उद्यानेषु, विद्यालयेषु च अधिकाधिकं__(vi)___रोपणीया:। जनजागरणार्थम् "वृक्षो रक्षति रक्षित:, जलम् एव जीवनम्" एतादृशानि वाक्यानि ___(vii)___लिखित्वा यत्र-तत्र टङ्कनीयानि। ध्वनिप्रदूषणं निवारयितुं ध्वनिप्रसारण-यंत्राणाम् (viii)__प्रयोग: करणीय:। अस्मिन् _(ix)__ भवत्या: विद्यालये किं किं भवति इति विस्तरेण लिखतु। पितरौ वन्दनीयौ।

भवत्या: सखी

(x)

**मञ्जूषा**

लता, स्नेहस्निग्धे, पर्यावरणविषये, न्यूनतम:, वृक्षा:, रक्षणाय, विषये, पट्टिकासु, जलप्रदूषण-निवारणाय, गृहात्

3(i) **मञ्जूषायां प्रदत्तशब्दानां सहायतयाचित्रं दृष्ट्वापञ्चवाक्यानि लिखत।** 10



**मञ्जूषा**

पर्वतीयस्थल:, उच्चपर्वता:, हस्ते, लघुवृक्षा:, पुरुषौ, बालिका:, सन्ति, तिष्ठन्ति, मतदानपत्रम्, धारयत:, प्रसन्ना:, जलम्, हिममण्डिता:, वस्त्राणि, गच्छन्ति, उन्नते स्थाने, शैत्यम्

**अथवा**

3(ii) **'निर्धन: कृषक:' इति विषयम् अधिकृत्य पञ्चवाक्यानि लिखत।** 10

**मञ्जूषा**

निर्धन:, कृषक:, लघुक्षेत्रम्, द्वाभ्याम् वृषभाभ्याम्, अत्यधिकम्, परिश्रमम्, बीजवपनम्, यदा, तदा, वृष्टि:, करोति, हलम्, कर्षति, आतपे, सहते, भवति, कष्टानि, शस्यम्, अल्पम्

**खण्डः 'ग'**

**अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )**

| | | |
|---|---|---|
| 4 | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं विच्छेदं वा कृत्वा लिखत।**<br>(i) पित्रा सः तच्छिक्षया वञ्चितः न कृतः।<br>(ii) राजा उवाच यथा+ उचितम क्रियताम्।<br>(iii) शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा।<br>(iv) तत्र कः+अपि जनः पठति।<br>(v) प्रातः भानूदयः भवति। | 5 |
| 5 | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।**<br>(i) भयत्रस्ताः कपयः अचिन्तयन् - हा हताः वयम्।<br>(अ) भयात् त्रस्ताः (ब) भयेन त्रस्ताः<br>(स) भयैः त्रस्ताः (द) भयं त्रस्ताः<br>(ii) जलं ददाति इति कथ्यते।<br>(अ) जलदः (ब) जलदम्<br>(स) जलदा (द) जलद<br>(iii) पञ्चकूपम् इति स्थानं को न जानाति!<br>(अ) पञ्च कूपाः (ब) पञ्चकूपानि<br>(स) पञ्चकूपी (द) पञ्चानां कूपानां समाहारः<br>(iv) शताब्दी -पर्यन्तम् स्वतन्त्रतासंघर्षः अचलत्।<br>(अ) शत अब्दी (ब) शतानाम् अब्दी<br>(स) शतानाम् अब्दानां समाहारः (द) शतस्य अब्दानां समाहारः<br>(v) वीरपुरुषैः देशस्य स्वतन्त्रतायै सर्वस्वम् दत्तम्। | 6 |

| | | | |
|---|---|---|---|
| | | (अ) वीरैः पुरुषैः (ब) वीराः पुरुषाः<br>(स) वीरम् पुरुषाः (द) वीरा पुरुषाः<br>(vi) शिशोः <u>मुखम् कमलम् इव</u> दृष्ट्वा मनः प्रसन्नः।<br>(अ) मुखकमलम् (ब) मुखकमले<br>(स) मुखकमलानि (द) मुखकमलस्य | |
| | 6 | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत।**<br>(i) दिल्लीनगरे <u>दृश् + अनीयर्</u> स्थानानि सन्ति।<br>(ii) तत्र <u>धनिनः</u> वसन्ति।<br>(iii) वाल्मीकेः कालात् <u>लोक+ठक्</u> संस्कृतं प्रारब्धम्।<br>(iv) कदापि असत्यं न <u>वदितव्यम्</u><br>(v) सैनिकाः <u>बल + मतुप्</u> सन्ति। | 5 |
| | 7 | **मञ्जूषायाः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत ।**<br>(i) __________भोजःनाम नृपः आसीत्।<br>(ii) __________ कविताम् पठ।<br>(iii) विद्याम् __________ नरः पशुतुल्यःभवति।<br>(iv) ________ अध्यापकः कथयति त्वम् तथैव कुरु।<br>(v) __________ अहं गीतं लिखामि।<br>**मञ्जूषा**<br>विना, यथा, अधुना, पुरा, उच्चैः | 5 |
| | 8 | **अधोलिखिते संवादे वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत।**<br>उमा – किं त्वं वृक्षपादपान् विद्यालयं नयसि?<br>रमा – आम् मया विद्यालयं वृक्षपादपाः ___(i)___।<br>उमा – कः वृक्षान् रोपयति? किं छात्रैः ___(ii)___रोप्यन्ते?<br>रमा – आम् तैः विद्यालयस्य उद्याने वृक्षाः ___(iii)___। | 5 |

| | | | |
|---|---|---|---|
| | उमा – किं छात्राः ___(iv)___ सिञ्चन्ति ?<br><br>रमा – आम् छात्रैः वृक्षाः ___(v)___ । | | |
| 9 | **अधोलिलिखितेषु वाक्येषु अंकानां स्थाने संस्कृतपदानि लिखित।**<br>(i) सः (5:00)__(i)__वादने उत्तिष्ठति।<br>(ii) दन्तधावनं कृत्वा (5:30)__(ii)__वादने भ्रमणाय गच्छति।<br>(iii) तत्र (7 : 15)__(iii)__वादनपर्यन्तं व्यायामम् अपि करोति।<br>(iv) गृहमागत्य (8 : 45)__(iv)__ वादने कार्यालयं गच्छति। | 4 | |
| | **खण्ड : 'घ'**<br>**पठित-अवबोधनम् – 35 अङ्काः** | | |
| 10 | अथ एकदा भगवान् बोधिसत्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा बभूव। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म।<br><br>**I. एकपदेन उत्तरत।**<br>(i) राजा कस्मिन् पारङ्गतः आसीत् ?<br>(ii) बोधिसत्वः केषां राजा बभूव ?<br><br>**II. पूर्णवाक्येन उत्तरत।**<br>बोधिसत्वः कथं राजा बभूव ?<br><br>**III. अधोलिखितप्रश्नयोः उत्तरं विकल्पेभ्यः चित्वा लिखत –**<br>(i) 'पालयति स्म' – इति क्रियायाः कर्तृपदं किम् ?<br>(अ) पुत्रवत् (ब) रतः<br>(स) विनयशीलः (द) असौ<br>(ii) 'अभवत्' इत्यर्थे किं पदं प्रयुक्तम् ?<br>(अ) बभूव (ब) आसीत् | 5 | |

| | | | |
|---|---|---|---|
| | | (स) राजा (द) भगवान् | |
| 11 | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।**<br><br>चञ्चलं हि मन: कृष्ण! प्रमाथि बलवद्दृढम्।<br><br>तस्याहं निग्रहं मन्येवायोरिवसुदुष्करम्।।<br><br>**I. एकपदेन उत्तरत।**<br><br>(i) अस्मिन् श्लोके सम्बोधनपदं किम्?<br><br>(ii) चञ्चलं किम् अस्ति?<br><br>**II. पूर्णवाक्येन उत्तरत।**<br><br>मनस: वशीकरणं केन समं दुष्करम्?<br><br>**III. निर्देशानुसारम् शुद्धम् उचितम् उत्तरं प्रदत्तविकल्पेभ्य: चित्वा लिखत –**<br><br>(i) 'बलवद्' इति कस्य विशेषणम्?<br><br>(अ) दृढस्य (ब) कृष्णस्य<br><br>(स) मनस: (द) चञ्चलस्य<br><br>(ii) 'मन्ये' इतिक्रियापदस्य कर्तृपदं किम्?<br><br>(अ) अहम् (ब) तस्य<br><br>(स) तस्याहम् (द) निग्रहम् | 5 |
| 12 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत ।**<br>अमात्या: – महाराज! अलम् एतावता दुस्साहसेन, याचकाय प्रभूतं धनमेव दीयताम्।<br>राजा – दास्यमीति प्रतिज्ञाय योऽन्यथा कुरुते मन:।<br>कार्पण्यानिश्चितमते: क: स्यात् पापतरस्तत:।।<br>नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्त्तानां परित्राणाय एव मे निश्चय:। | 5 |

| | | | |
|---|---|---|---|
| | | याचकस्य याच्ञा वृथा मा अस्तु। इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्।<br>**I. एकपदेन उत्तरत।**<br>(i) राजा स्वचक्षुः कस्मै समर्पितवान्?<br>(ii) केषां परित्राणाय राज्ञः निश्चयः?<br>**II. पूर्णवाक्येन उत्तरत।**<br>अमात्याः याचकाय दातुं राजानं किम् अवदन्?<br>**III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत—**<br>(i) 'प्रार्थना' इति अर्थे नाट्यांशे किं पदं प्रयुक्तम्?<br>(अ) प्रीत्या (ब) एतावता<br>(स) वृथा (द) याच्ञा।<br>(ii) 'दास्यामि' इति क्रियापदस्य कर्तृपदं किम्?<br>(अ) मनः (ब) अहम्<br>(स) राजा (द) यः | |
| | 13 | **मंजूषातः उचितपदानि चित्वा अधोलिखितपंक्त्योः भावार्थौ पूरयत।**<br>**I.** अस्य याच्ञा वृथा मा अस्तु।<br>**भावः** – शिबीनां राजा कथयति– "मम निश्चयः तु पीडितानां रक्षणाय एव अस्ति, अतः अस्य ___(i)___ चक्षुर्दानस्य ___(ii)___ निष्फलं न ___(ii)___ अवश्यमेव अस्मै स्वनेत्रे ___(iv)___ ।<br>**II.** अहं भवते चक्षुर्द्वयमेव प्रयच्छामि।<br>**भावः** – नेत्रहीनयाचकस्य रूपं धारयित्वा इन्द्रः बोधिसत्त्वं परीक्षितुम् तम् एकं ___(i)___ याचते परम् उदारः ___(ii)___ तस्मै ___(iii)___ एव दातुम् ___(iv)___ भवति।<br>**मंजूषा**<br>नेत्रद्वयम्, नेत्रं, दास्यामि, याचकस्य, तत्परः, याचनं, भवतु, बोधिसत्वः। | 4 |
| | 14 | **मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत।**<br>नलिनीदलगतजलवत्तरलं किम्? यौवनं धनं चायुः।<br>कथय पुनः के शशिनः किरणसमाः? सज्जना एव॥<br>**अन्वय** – नलिनीदलगतजलवत्तरलं किम्? यौवनं धनं आयुः ___(1)___ । ___(2)___ | 4 |

| | | | |
|---|---|---|---|
| | ___(3)___ शशिनः किरणसमाः ___(4)___ ? सज्जना एव।<br>**मञ्जूषा**<br>पुनः, च, कथय, के | | |
| 15 | **वाक्येषु रेखांकितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत –**<br>(i) <u>शारदा</u> सर्वम् ददाति।<br>(ii) शारदायाः वदनं <u>अम्भोजस्य</u> इव अस्ति।<br>(iii) अस्माकं मुखम् <u>अम्बुजेन</u> सदृशम् अस्ति।<br>(iv) <u>शीतला</u> छाया पुरुषं न प्रह्लादयति। | 4 |
| 16 | **घटनाक्रमानुसारम् अधोलिखितानि वाक्यानि पुनः लेखनीयानि।**<br>(i) राजगृहे जिह्वालोलुपः एकः मेषः महानसं प्रविश्य यत् किमपि खादति स्म।<br>(ii) तत्रस्थान् दग्धान् अश्वान् दृष्ट्वा राज्ञा वैद्याः आहूताः।<br>(iii) मेषताडनं दृष्ट्वा वानरयूथपः कपीन् राजभवनं त्यक्तुम् अकथयत्।<br>(iv) वानरमेदः एव औषधम् इति श्रुत्वा मृत्युभयात् कपयः पश्चात्तापम् अकुर्वन्।<br>(v) एकस्मिन् प्रासदे चन्द्रनाम्नः भूपतेः पुत्राः वानरैः सह क्रीडन्ति स्म।<br>(vi) परं वानराः स्वर्गतुल्यान् भोज्यपदार्थान् त्यक्तुं न ऐच्छन्।<br>(vii) सूपकाराः तं येन केन पदार्थेन ताडयन्ति स्म।<br>(viii) एकदा ज्वलितकाष्ठेन ताडितः ज्वलन् मेषः अश्वशालां प्राविशत्। | 4 |
| 17 | **रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थम् चित्वा लिखत।**<br>(i) न्याय्ये पथि <u>दृष्टादृष्टलाभाढ्ये</u> स्थातव्यम्<br>(अ) दृष्टेपथि (ब) अदृष्टे मार्गे<br>(स) दृष्टे अदृष्टे च मार्गे (द) भाग्यस्यलाभैः पूर्णे<br>(ii) मनः <u>वैराग्येण</u> गृह्यते।<br>(अ) रक्तेन (ब) रक्तवर्णेन<br>(स) आसक्त्या (द) रागस्य अभावेन<br>(iii) कतिपयैः दिनैः व्रणविरोपणे <u>जाते</u>राजासरोवरस्य तटे विहरति स्म।<br>(अ) जन्मनिगृहीते (ब) पुत्रि<br>(स) निष्पन्ने (द) पुत्री<br>(iv) आमरणात् किं <u>शल्यम्</u>? | 4 |

| | | | |
|---|---|---|---|
| (अ) | शालि: | (ब) | कण्टकम् |
| (स) | शस्यम् | (द) | शल्यचिकित्सा |

JSUNIL TUTORIAL
ACBSE Coaching for Mathematics and Science